श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीवरदविष्णुकविप्रणीतम्

# ॥ श्रीकोमळादण्डकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीकोमळादण्डकम् ॥

सकलभुवनमाता सागराधीशजाता
    प्रणमदवनकामा भास्करक्षेत्रधामा।
शकलित भयमूला शार्ङ्गधन्वानुकूला
    प्रविमल मुखबिम्बा पातु मां कोमलाम्बा॥

भुवनतलललामभूतां निमज्जद्व्यथा तापहृत्पूरजाताऽम्बु -
जान्तर्निपीतासवस्त्रीसमेतालिझङ्कारगीताभिरामाऽतिशी -
ताम्बुसह्याद्रिजातातरङ्गोत्थवाताऽङ्कुराश्रान्तधूताऽधिकू -
लस्थचूतादिपुष्पाभ्युदीताऽतुलामोदजाताऽतिरेकप्रणी -
ताऽतनूद्रेकवाताऽऽयनासक्तशीतांशुमुख्यास्यलीलोद्भव -
त्सर्वकालोन्मिषत्तुङ्गशैलोल्लसन्निर्मलाऽऽलोकशुभ्रांशुजालो -
त्कटभ्रान्तिमश्रान्तसद्द्रव्यविश्राणनाऽऽसक्तविश्रान्तिभूमि -
क्षमापालवर्यैः सदा पालितां ध्वस्तपापां प्रमाद्यद्गजाली -
कनद्गण्डपालीमदास्वादकेलीसमुद्यद्द्रवालीन्द्रशोभिप्रतो -
लीसमुद्यन्निषद्यालसत्पण्यहृद्यामुदारामवद्यानभिज्ञां
च विद्यावधूविभ्रमोद्यानवेदान्तवेद्याश्रितां सन्ततेज्यात्र -
तारब्धयाज्यान्तवेलाऽहुताज्यादिहव्यांशभोज्यादितेयाग्र्यरा -
ज्यादृतस्तोत्रघोषाहताशेषदोषां क्वचिन्निर्निमेषाङ्गना -
निर्विशेषाऽकृतिस्फूर्जदेणाक्ष्युपाश्लिष्टवीणारदोज्जीवितैणा -
ङ्कचूडाक्षिकोणाग्नि सात्पञ्चबाणां पुरीं कुम्भकोणाह्वयां
भूषयन्ती सुरान् तोषयन्ती नतान् पोषयन्ती भयं शोषयन्ती
मरालीगरुद्धातवेगावमग्नाऽजगर्भोत्पतत्पुष्पलिङ्गूचित -

स्वाम्बुमज्जज्जनांहोविमुक्तेः सुवर्णाम्बुजिन्यास्तटान्ते
नमस्यार्थमभ्यागतैः विस्मयान्निश्चलाङ्गैरिवाऽलङ्कृते पुत्रि -
कारूपदेवैर्विमानेसमाने स्थिता कोमलाम्ब ! त्वम -
स्मानवेः ॥ 1 ॥

अखिलजननि ! शार्ङ्गपाणिप्रिये ! कीरवाणि ! प्रसर्पत्कृपाणि प्रभा -
बन्धुराणि व्यथामोक्षणानि स्तुवद्रक्षणानि स्फुटाऽनीक्षणा -
नि प्रकामं निधेहि प्रणम्रे मयि प्रोल्लसत्पद्मवाटीगृहे
स्वर्णशाटी युते ! स्वर्वधूटीकरोत्क्षिप्तवीटीदलास्वादधा -
टीसुशोणोष्ठि ! चेटीभवद् देवकोटीशिरःस्थास्नुकोटीर -
जुष्टाङ्घ्रियुग्मे ! प्रियोरोविहारे ! प्रकृष्टांशुहारे ! मरा -
लीप्रचारे ! महिष्टोपचारे ! कृताघव्युदासे ! कृपागु -
प्तदासे ! भवद्दृष्टिलेशो भवेच्चेदधीशो विशां वा दिशां
वा जनो जायतेऽल्पोऽपि मूढोऽप्यहो ! कल्पवल्लीसुमाऽनल्पमा -
ध्वीझरीकल्पभूयो भवज्जल्पभाक् कंसजित्तल्पभङ्गं गिरा
कल्पयत्यन्तिके शार्ङ्गधन्वाह्वयं भासते यन्महस्तत्प्रिया -
यां रमायां महोदारता नित्यसिद्धा द्विधाऽपीति सर्वे
बुधास्त्वां रमे शौरि रामेऽरविन्दालये मे गतिर्न त्वद -
न्ये सुरास्सिन्धुकन्येऽम्ब ! लक्ष्मीन्दिरे ! मन्दिरेष्वक्षि
निक्षिप्यतां नस्त्वयेत्यानमन्ति प्रकामं जगन्ति प्रमोदोल्लसन्ति
त्वयाऽस्मूनि सन्ति, स्फुरच्चन्द्ररश्मिच्छटामिश्रितेनेव मेघ -
व्रजेन स्ववक्त्रात्मना पूर्णचन्द्रेण पाश्चात्यदेशे सितै
रज्जुजालैर्निबद्धात्मनेवाऽन्धकारेण गङ्गा झरीसङ्गभा -
जेव सूर्यात्मजास्रोतसामल्लिकामालिकाशोभिना केशपा -
शेन नीलप्रकाशेन संशोभिते हेमभाऽपि त्वमत्यद्भुतं
कृष्णकान्ते प्रसीदेति सम्प्रार्थ्यसे साधुभिः ॥ 2 ॥

सुमशरललनाऽभिरामे ! कृतापद्विरामे ! रमे ! शार्ङ्गिरामे सदा
सादरा मे मनोवृत्तिरास्तां त्वयि श्रीः ! स्फुटं मूर्धजानां द्विधा
संविभक्तात्मनामन्तरे भास्वता भव्यसिन्दूररेखान्विते -
नाऽम्बुदान्तर्लसच्चञ्चलावल्लिसन्देहसन्दायिना दीर्घसीम -
न्तमार्गेण सम्भूषितं, कुङ्कुमै रूषितं, सूक्ष्मलक्ष्माऽन्विता -
र्धेन्दुतुल्येन कस्तूरिकाचित्रकोद्भासिना फालभागेन
चोद्भासितं, रोचनावासितं मञ्जिमाऽध्यासितं मन्दहासैः सितं
वक्रकान्तिप्रवाहोत्थ वीचिभ्रमाधायिना रुद्रनेत्राग्निना -
ऽस्यापि सार्धं मया मा स्म भूद्दाहकर्मेति निश्चित्य मातृत्व -
सम्बन्धतः सूनचापाऽऽहितेनेव चापोत्तमेन भ्रुवोर्द्वन्द्वतः
शोभमानं, श्रिया निस्समानं, निरस्तेन्दुमानं, श्रवःपूरनीलोत्पलद्व -
न्द्वमाध्वीकपानार्थम् अभ्यागताभ्यां पुरो वीक्ष्य नासात्मकं
चम्पकं त्वद्भयेनेव पारिप्लवाभ्यामिवेन्दिन्दिराभ्यां मणीक -
र्णताटङ्करश्मिप्रवाहस्फुरन्मीनशङ्कावहाभ्यां, मुखे स्वीयब -
न्धुभ्रमाद् आगताभ्याम् इवेन्दीवराभ्यां लसल्लोचनाभ्यां
ज्वलत्कुण्डलद्वन्द्वरत्नप्रभा चित्रिताभ्यां मुरारातिलीलामणीदर्पणा -
भ्यां कपोलस्थलाभ्यां श्रितं, लोचनेन्दीवरत्विङ्भ्रमाधायि
नीलोत्पलाऽलङ्कृतश्रोत्रयुक्तं, सुखोत्पादशक्तं प्रसादानुषक्तं
स्वपर्वोत्थितभ्रान्तिसन्दायिमुक्तालसन्नासिकावंशवल्ल्यु -
ज्ज्वलं वक्रचन्द्रान्तरुद्भासिपीयूषबिन्दुभ्रमाधायिदन्ताश्रितं
सन्दधत्यां मुखम् ॥ 3 ॥

कलितनमदभीष्टपूर्ते ! विधूताऽमरार्ते ! सुरीगीतकीर्ते स्फुर -
द्भव्यमूर्ते ! त्वदीयस्य कण्ठस्य भासा जितस्य स्वकीयप्रभोः
सन्निधौ भङ्ग आसीन्ममेति स्ववाचा विशिष्टाऽभिधाने ह्रिया
भं भम् इत्येकदेशं ब्रुवाणस्य शङ्खेशितुः पाञ्चजन्यस्य घोषेण
युद्धाङ्गणे सर्वशङ्खाभिमानः पराहन्यते किम् ! विधूद्य -

त्करस्पर्श जातादराः चक्रवाका यदि स्युः भवेयुस्तदैतत्स -
माना इति प्राज्ञवर्यैः स्तुताभ्यां लसन्नाभिकूपान्तसंरूढरोमालि -
वल्लीगुलुच्छभ्रमाधायकाभ्याममर्त्यापगाशोभितप्रान्तनी -
लाऽम्बुदाऽश्लेषवच्छृङ्गमेरुद्वयभ्रान्तिसन्दायकाभ्यां
समुक्तासराभ्यां कुचाभ्यां लसत्क्रोडभागे ! नमद्देवयूगे ! हरौ
सानुरागे ! स्तनोर्वीधरप्रान्तसञ्जातवल्ली भ्र -
माधायिबाहाग्रदेशोल्लसत्पल्लवभ्रान्तिसन्दायिपाण्यङ्गुली -
पङ्क्त्युपर्युद्भवत्कोरकश्रेणिसन्देहकृद्भिर्नखै राजिते ! योगिभिः
पूजिते ! मध्यसंयोजिते मेखलादाम्नि सर्पत्वमाशङ्कमानेन
लोकेन वल्मीकमेवेति सम्भावितायां स्वकीयाऽङ्गभूषांशु -
पूरे सदाऽऽवर्तशोभां वहन्त्यां स्वनाभ्यां भ्रमच्छाङ्गिचित्ते !
प्रशस्त प्रपत्ते ! तवोरू सुचारू जितादर्शभानू जगद्धात्रि !
जानू कृताम्भोजखेदौ कृपावापि पादौ समस्तेऽपि लोके समाना -
स्त्वया के? त्वमेवासि माता; स शार्ङ्ग्येव नेता; तवैवास्मि
नित्यम्; तथा वच्मि सत्यम्; रमे ! पाहि मां पाहि मां देवि ! तुभ्यं
नमः ॥ 4 ॥

अतिमृदुल वचन गुम्भं
वरमेतद् वरदविष्णु कवि कथितम्।
दण्डकरूपं स्तोत्रं
कोमलवल्लीमनोमुदे भवतु ॥ 5 ॥

॥ इति श्रीकोमळादण्डकं समाप्तम् ॥